# DEPARTMENT OF SANSKRIT
# HINDU COLLEGE GUNTUR

## 2021-2022

## STUDENT SEMINAR

Scanned with ACE Scanner

# हिन्दू कलाशाला

# निर्दिष्ट निबन्धिका


अभ्यासः : महाकविः भासः

नाम : साले. रम्य

क्रमसंख्या : ०६ सेम - I

विभाग : I. बिकाम् [ कंम्पुयतर ]

Scanned with ACE Scanner




Scanned with ACE Scanner

# महाकविः भासः

**कविपरिचयः-**

"काव्येषु नाटकं रम्यम्", "नाटकान्तं हि साहित्यम्" इत्यादिवचनानि नाटकरचनायाः रमणीयं साहित्यप्रक्रियासु सर्वोत्कृष्टत्वं च समुद्घोषयन्ति। प्रपञ्चे संस्कृतरूपकाणां विशिष्टं स्थानं वर्तते।

संस्कृतनाटकप्रपञ्चे प्रथितयशाः महाकविः भासः आद्यत्वम् आवहति। कालिदासादयो महाकवयः भासस्य नाट्यकलया अतिमात्रं प्रभाविताः अभूवन्। तथा च कालिदासः स्वीयनाटकस्य मालविकाग्निमित्रस्य प्रस्तावनायां भासस्य नाटकरचनासमुत्कर्षम् अवभासयन् स्वयमेवाह-

"प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धान् अतिक्रम्य वर्तमानकवेः कालिदासस्य कृतौ कथं बहुमानः?" इति।




भासो हासः कविकुलगुरुर्वत्सराजो
विलासः भासः श्रीकालिदासश्च वत्सराज
इति त्रयः ।
नान्यसीमन्तिनीहावविलासाः कवयः परे ॥

Scanned with ACE Scanner


## भासस्य समयः

अन्येषां प्राचीनशास्त्रीयमहाकविनामिव भासमहाकवेरपि कालनिर्णयः न सुकरः। किन्तु महाकविना कालिदासेन मालविका प्रस्तावनायां पूर्वनाटककाराणां भासस्य नाम्नः आदौ समुल्लिखितत्वात् तस्य कालिदासपूर्ववर्तित्वं असंदिग्धं निरूपयितुं शक्यते भासस्य जीवनवृत्तमधिकृत्य प्रमाणं।



भासो, वैदिकाचारसम्पन्नः प्रकृतिपरिशीलकः मनस्तत्त्वाभिज्ञश्च दृश्यजाता।

भासस्य जीवनवृत्तमधिकृत्य प्रमाणं किञ्चिद्
न लभ्यते। परन्तु केषाञ्चित् विपश्चितां
विमर्शकाणां विचारानुसारं वक्तुं शक्यते यत् भासः
धार्मिकः मानी, वैदिकाचारसम्पन्नः
प्रकृतिपरिशीलनदक्षः मनस्तत्त्वाभिज्ञश्च
चासीत्। कृष्णभक्तिपरश्चासीत् भासस्य





स्वभावः अतिदान। महाकवेरस्य नाटकेषु
भरतवाक्यानु सारेण आसमा राष्ट्रिय भावना
स्पष्टं प्रतीयते।

## भासस्य शैली

भासस्य रचना प्रसादगुणालङ्कृता सर्वविध सहृदयजनरञ्जनी विराजते। अस्य लोकान्तरकल्पना शक्तिः अद्भुतनीया विद्यते।


"भासो हासः इति प्रसिद्धिः अभवत् सरस्वत्याः हरहासः एव भासः इति तस्याः वाचोयुक्तिः भवः।

## भासस्य रूपकाणि



अत्यन्तप्राचीनस्य भासस्य रूपकाणां नामानि अनेकत्र यद्यपि प्रस्तुतानि तथापि तानि रूपकाणि विंशतितम-शताब्दीपर्यन्तं प्रकाशकाशं न अलभन्त। क्री. श. 1912 संवत्सरे महामहोपाध्यायाभिरूवाशिनेन गणपतिशास्त्रिमहाशेन अंशोदयो प्रथमतमयो


गणपतिशास्त्रिमहाभागैः संशोध्य प्रथमतया मुद्रापितानि भासविरचितानि त्रयोदश रूपकाणि संस्कृतसाहित्यजगति परमाह्लादपूरकाणि । तानि रूपकाणि यथा-



1) स्वप्नवासवदत्तम्
2) प्रतिज्ञायौगन्धरायणम्
3) अविमारकम्
4) बालचरितम्
5) पञ्चरात्रम्
6) मध्यमव्यायोगः
7) दूतवाक्यम्
8) कर्णभारम्
9) ऊरुभङ्गम्
10) दूतघटोत्कचम्
11) प्रतिमा 12) अभिषेकनाटकम्
13) चारुदत्तम्

भासस्य बहुरूपककर्तृत्वमुद्दिश्य महाकविः
बाणभट्टः अमुपश्लोकयति यथा:-

सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव॥



नमपि पुंस्त्वं इत्याद्य कापि। वृत्तं हि
वैदिककाले अस्युप्तं नाट्यबीजं रामायणकाले
अंकुरितं दृश्यते।
तदा नाट्यं नृत्तं गानञ्च जीवनाङ्गानि वाद्यवृन्देन
गृहीतानि दृश्यन्ते नर्तकानर्तक्यादयः। तत्र
यथा:।

Scanned with ACE Scanner

# हिन्दू कलाशाला, गुण्टूरु

## संस्कृत विभागः

## निर्दिष्टनिबन्धिका

१ प्रथम वत्सरः, सेम -२

नाम :- डि. भासकरः

अंशम् :- चम्पूरामायणम् [बालकाण्डम्]

विभाग :- बिकाम् [कम्प्यूटर्स्]

वत्सरः :- प्रथम वत्सरः

क्रमसंख्या :- १६७

चरवाणीसंख्या :- ९३९२३३४५५२

छात्रस्य हस्ताक्षरी

उपन्यासकस्य हस्ताक्षरी

Scanned with ACE Scanner




Scanned with ACE Scanner

॥ श्रीः ॥

## श्रीभोजराजविरचितं

# चम्पूरामायणम् ।

## श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम् ।

## बालकाण्डम् ।

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

शिवानन्दाश्रयगुरोश्चरणस्मरणं मम ।
उत्साहशक्तिजं तेजस्तनोतु मुखपङ्कजे ॥

विद्येश विधिमार्तण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥

सीताकल्पलतान्वितं दशरथाम्भोराशिजं सोदरो-
दारस्कन्धमभीष्टदं सुमनसां श्रेणीभिरामोदितम् ।
नित्यं स्वाश्रितनन्दनं किसलयश्रीपद शाखोज्ज्वलं
श्रीरामामरभूरुहं हृदि सदा सेवेऽर्थसंसिद्धये ॥

सुधाकरसुधाकराच्छरदभ्रास्वराभास्वरा -
-चितक्रमविपश्चिकाणनसादरा सादरा ।

विरिञ्चिनवमोहनागमविशारदा शारदा
मदीयरसनाङ्गणे नटतु सर्वदा सर्वदा ॥

यत्पादाम्भोजरेणुं विबुधकविवराः प्राप्य सिद्धाञ्जनं वा
प्रज्ञादृष्टेः प्रमीलां पटुतरतमसा प्रापुरुद्यद्गुणाढ्याम् ।
आम्नायोन्मेषमात्रविधिमिव कवितां प्रापुरुद्यद्गुणाढ्यां
निष्प्रत्यूहं मुदास्मान्स सुरवरनुतः पातु हेरम्बदेवः ॥

श्रीमांस्त्रैलिङ्गदेशे स जयति विबुधश्रेणिकोटीरकोटी-
कोटीमाणिक्यभूतागणगणो ऽखण्डपाण्डित्यशौण्डः ।
धीरः शाण्डिल्यगोत्रः सकलविकुलादिसूक्ति प्रवीणो
वीणोदाहार्य विद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्रः ॥

नित्यं संभ्रमजृम्भिता नटति यज्जिह्वाङ्गणे भारती
जयन्ते कविपुंगवास्तनुभृतो यद्व्रप्रनिर्वर्णनात् ।
भोजक्षोणिभुजामुना विरचितश्चम्पूषवन्धोऽधुना
व्याख्यां तस्य करोमि मञ्जुलतरां साहित्यमञ्जूषिकाम् ॥

व्याकुर्वन्ति निबद्धगौरवभयात्रैव स्फुटं युक्तिभि-
र्ये तेऽध्येतृजनप्रतारणपराः का नैपुणी वा ततः ।
वैखर्या वचसां कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रविवृणोम्युक्तिव्रजोजृम्भितम् ॥

अथ खलु तत्रभवान्विचित्रसरसकविताकल्पनतामजर्यमो
दिताशेषविबुधसमाजो - नवधानिखिलविद्याभिज्ञः सर्वज्ञसार्वभौमो
भोजनामा महाराजः समस्तसद्गुणमणिगणाभि - रामस्य तार
कब्रह्मरूपिणस्तत्रभवतः श्रीरामस्य चरितानुवर्णनं निःश्रेय
सनिदानं निजान्तरङ्गे निर्णय 'काव्यं यशसेऽर्थकृते
शिवेतरक्षतये । सद्यः परिनिर्वृतये कान्तासं-मिततयोपदे
- शयुजे ॥ इत्याद्यलंकारवचनप्रामाण्यात् ,काव्यसेवने श्रेयः
साधनतां 'का व्यालापांश्च वर्जयेत्' इति निषेधस्या
सत्काव्यविषयतां च पश्यन्, सकलकल्याणपरायणं
श्रीरामायणं चम्पूप्रबन्धात्मना चिकीर्षुः चिकीर्षितान्तरा
यपरिसमाप्ति प्रचयगमनलक्ष - णफलसाधनत्वात् 'आशी
र्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याचार्यदण्डिव
चनादाशीरधन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च तत्रादौ
लक्ष्मीशब्दपूर्वकमाशिषं प्रयुङ्क्ते -

लक्ष्मीं तनोतु नितरामितरानपेक्ष-
मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ १॥

Scanned with ACE Scanner

लक्ष्मीमिति। आद्रौ लक्ष्मीशब्दप्रयोगाद्वर्णगणादिशुद्धेरव्युच्छः।
तदुक्तम् 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा॥ इति।
निगमा वेदास्त एव शाखिनो वृक्षाः। 'वृक्षो महीरुहः
शाखी' इत्युपक्रम्। मौलयश्च प्रतियन्ते। तासां प्रवालं
नवपल्लवम्। वेदान्तवेद्यमित्यर्थः। 'यिस्त्रा ज्वालाकेकिमौ
ल्योः शिखा शाखाग्रमौलियु' इति वैजयन्ति। 'प्रवालो
वल्लकीदण्डे विद्रुमे नवपल्लवे' इति शब्दार्णवे। अम्बुनि
रोहतीत्यम्बुरुहं पद्मं तस्य यो डम्बरः सौभाग्या-
तिशयसंरम्भस्तस्य चौर्येऽपहरणे। ब्राह्मणादित्वात्ष्यञ्।
निघ्नमायत्तम्। अम्बुरुहसौ भाग्यापहारीत्यर्थः। 'अधीनो
निघ्न आयत्तः' इत्यमरः। अत एव सादृश्यपर्यवसाना
द्रूपमा। डम्बरेरत्र दृम्यन्ते भीरवोऽनेनेति डम्बरः।
'दमु उपशमे'। औणादिकत्वा द्वरप्रत्ययः, पृषोदरा
दित्वाद्वर्णव्यत्ययश्च। सुबोधिनीकारस्तु -'डम्ब विक्षेपे'
इति चान्द्रो धातुरस्तीत्याह। तन्मते डम्बं
विक्षेपं रातीति डम्बरः। 'आडम्बरोऽपि संरम्भः'
इत्यमरशेषश्च। विहन्यन्त एभिरिति विघ्नाः प्रत्यूहाः
'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। घ्नन्त्यौ

कल्विधानम्' इति कप्प्रत्ययः। त दावाद्रयः पर्वतास्तेषां भेदे विदारणे शतधारधुरंधरं वज्रायुधसमानसारम्। अशेषविघ्नविनाशकमित्यर्थः। धूरेव धुरा। 'आपं चैव हलन्तानाम्' इति वचनाट्टाप्। तां धारयतीति धुरंधरम्। संज्ञायां भृवृवृजि- इत्यादिनाण्प्रत्ययः। खित्यनव्ययस्य' इति ह्रस्वः। अरुर्द्विषत् -इत्यादिनामुमा वृजि -'इत्यादिनाण्प्रत्ययः।'खित्यनव्ययस्य' इति ह्रस्वः।
' अरुर्द्विषत् - इत्यादिना मुमागमः। हेमम्बस्येदं हैरम्बं वैनायकम्। 'तस्येदम्' इत्यण्। अङ्घ्रिद्वयं चरणयुग्मम्। इतरेषु न विद्यते ऽपेक्षा यस्मिन्कर्मणि तद्यथा भवति तथेतरानपेक्षम्। इतरेषु न विद्यते ऽपेक्षा यस्मिन्कर्मणि तद्यथा। भवति तथेतरानपेक्षम्। भजनीयान्तर- निरपेक्षमित्यर्थः। इदं क्रियाविशेषणम्। यद्वाङ्घ्रिद्वयवि शेषणं तदा सहकार्यन्तरम- नपेक्ष्य स्वातन्त्र्येणैव सकलसेवकजनाभीप्सितदानसमर्थमित्यर्थः। नितरामतिशयेन किमे - त्तिङव्यय -' इत्यादिना आम्प्रत्ययः। नो ऽस्माकं लक्ष्मीमशेषाखिलविलार्थसंपत्तिं तनोतु क - रोतु। संपादयत्वित्यर्थः। तनोतेः 'आशिषि लिङ्लोटौ' इत्याशीरर्थे लोट्। शोभासंपत्ति पद्मासु लक्ष्मीः

श्रीरिति कथते इति शाब्दः। अत्राशीरलंकारः–'आशी-र्नामाभिलषिते वस्तुनः शासनं मतम्' इति लक्षणात्। अथ चोक्तोपमारूपकविरोधाख्यां तिलतण्डुल-वत्परस्परनैरपेक्ष्यात्संसृज्यते। तथा नितरा मतिरित्यादिषु नयुग्मानां तकाररेफयोः कारादीनां केवलानां चासकृदावृत्त्या वृत्त्यनुप्रासः शब्दालंकारः। तदुक्तं विद्यानाथेन–'ककारादिप्रभृतीनां तु व्यञ्जनानां यदा भवेत्। आवृत्तिर्यत्र संदर्भे वृत्त्यनुप्रास इष्यते॥ लकारस्य गुणादीनप्रत्ययग-मनसिद्धिः। प्रायेणात्र द्राक्षा पाकः–'द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः' इति लक्षणात्। तातदादिलोकपञ्चकं वसन्ततिलकावृत्तम्–उक्ता वसन्ततिलका तभजा जगौ गः इति केदारलक्षणात्॥ इदानीं तावत् 'मङ्गलादीनि मङ्गलमध्या-नि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इत्यादि-

उद्यौर्गतिर्जगति सिद्ध्यति धर्मतन्त्रे-
तस्य प्रमा च वचनैः कृतकेतरैस्तैः।
तेषां प्रकाशनदशा च महीसुरैस्तैः-
तानन्तरेण निपतेत्क नु मन्त्रणामः॥२॥

# हिन्दूकलाशाला,गुण्टूरु

## संस्कृत विभागः

## निर्दिष्टनिबन्धिका

## २ द्वितीयवत्सरः,सेम्–३

नामः:- बि. विनोद कुमारः

अंशम्:- श्रीमद् भगवद्गीता

विभागः:- बि.काम् कंप्यूटर्

वत्सराः:- २०२०-२०२१


क्रमसंख्या:- २०५

चरवाणीसंख्या:- ९४४२०३९८८६

बि. विनोद कुमारः
छात्रस्यहस्ताक्षरी

उपन्यासकस्यहस्ताक्षरी

Scanned with ACE Scanner




Scanned with ACE Scanner

**गीतोपदेशः** भगवता गीता भगवद्गीता। एतस्य गीतोपदेशः इत्यपि नामान्तरं वर्तते। श्रीकृष्णः अत्र उपदेशकः श्रोता अर्जुनः। वैदिकसनातनवर्णाश्रमधर्मतत्त्वनिहितं ऐकमात्रं धर्मग्रन्थत्वेन विद्यते एषा भगवद्गीता। गीतायाम् अष्टादश अध्यायाः सन्ति अस्याः मोक्षशास्त्रम्, ब्रह्मविद्या, गीतोपनिषत्, इत्यादीनि नामानि अपि सन्ति। प्रत्येकस्यापि अध्यायस्य पृथक् नाम वर्तते। कृष्णार्जुनयोः संवादानुसारम् अध्यायाः विभक्ताः।



**वैदिकवाङ्मये श्रीमद्भगवद्गीतायाः स्थानम्**

श्रीमद्भगवद्गीताख्यं शास्त्रं वैदिकवाङ्मये सम्पूर्णवेदस्याभिप्रायमिति भास्करवितं मतम् वेदवत् त्रिकाण्डात्मकत्वात्, समस्तवेदार्थसारसंग्रहभूतत्वात्, सर्वशास्त्रमयत्वात्, सर्वसाधारणलोकोपकारकत्वाच्च। प्रसिद्धिश्चास्त्येव-

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता गीतामृतं दुग्धं महत्॥

वासुदेव-पार्थयोः संवादरूपायाः गीतायाः अवसाने अर्जुन उवाच- 'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत। स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव'। अनेन मोहनाशः जातः यद् तदेव प्रश्नप्रतिवचनेन प्राप्तं संपूर्णशास्त्रार्थज्ञानफलमेवेति निश्चितं भवति। यतो ज्ञानान्मोहनाश आत्मस्मृतिलाभश्चेति तथा च श्रुतावप्यात्मविच्छोकपापमोहनाशाभावेन सर्वग्रन्थिविप्रमोक्ष उक्तः "भिद्यते हृदयग्रन्थिस्तत्र को मोहः कः शोकः एकत्वमनुपश्यतः" इति च मन्त्रवर्णः।

एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।

प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥

इति च मानवं वचनम्। यत् एतत्समाप्तितं अतः बुद्धवानसि ततः कृतार्थस्त्वं भारतेति"। भाष्यस्योपोद्घाते तदिदं गीताशास्त्रं समस्तवेदार्थ-सारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैः विवृतपदार्थवाक्यार्थ- न्यायमप्यत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थ निर्धारणार्थं संक्षेपतो विवरणं करिष्यामि। आचार्याः अस्याः शास्त्रे न विप्रतिपद्यन्ते। आचार्यलक्षणमत्र सम्मतिरेव-

नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार।

ततश्चैवविप्राप्ति परिहारार्थं नादर्शनाद्वेदार्थज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सकलवेदार्थोपबृंहितां तदनुक्त केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारत संहितामचीक्लृपत।

पुराणं भारतं चेति सर्वमिदं शास्त्रपुङ्गवः- इति नारायणाश्रमकल्पे॥

ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं स चकार ह।

यस्मिन् दशार्थाः सर्वत्र न ज्ञेयाः सर्व जन्तुभिः

- इति नारदीये

## भगवद्गीतायाः अध्यायाः

१. अर्जुनविषादयोगः
२. सांख्ययोगः
३. कर्मयोगः
४. ज्ञानकर्मसंन्यासयोगः
५. कर्मसंन्यासयोगः
६. आत्मसंयमयोगः
७. ज्ञानविज्ञानयोगः
८. अक्षरब्रह्मयोगः
९. राजविद्याराजगुह्ययोगः
१०. विभूतियोगः
११. विश्वरूपदर्शनयोगः
१२. भक्तियोगः
१३. क्षेत्रक्षेत्रज्ञविभागयोगः
१४. गुणत्रयविभागयोगः
१५. पुरुषोत्तमयोगः
१६. दैवासुरसंपद्विभागयोगः
१७. श्रद्धात्रयविभागयोगः
१८. मोक्षसंन्यासयोगः



मानवसमाजस्य श्रेयस्कामेन भगवता वासुदेवेन सनातना वैदिकधर्म समुपदिश्य नानाप्रपञ्चपूर्णे जीवने सार्वजनीनाः समस्याः असीमरीत्या समाहिताः। न केवलमर्जुनायापितु सर्वेभ्यः नकेवलं युद्धविषये ऽपि तु सम्पूर्णजीवनस्य येऽपि कार्याकार्ये तदवस्थायां शास्त्रमेव प्रमाणीकृतम्। गीतायाः सर्वविध महात्म्यं प्रासंगिकता चाद्यत्वे ऽपि यथापूर्वम्।

प्राचीनव्याख्यातारः, आधुनिकव्याख्यातारश्च :-

भगवद्गीता सर्वैरेव स्वकीयगुणविशेषैः समादृतास्ति प्रतिष्ठिता वैदिकपरम्परायाः सम्प्रदायकृत्सु प्रमुखाचार्येषु भाष्यकारेषु टीकाकारेषु तत्त्वचिन्तकेषु च। सा हि वेदव्यासप्रणीतत्वाद्धेतो परिगणीत व्याख्यातृभिश्च व्याख्याता स्वस्वसम्प्रदायसिद्धान्तानुसारेण। तथापि न कृतोपसंहारा ऽद्याप्यभिभवीति प्रभूतप्रभाव वसुधायाः। न केवलं भारतेऽपि तु विश्वस्मिन् जगतीतले भाषान्तरेष्वपि विद्वद्वर्यैर्व्याख्याताऽनूदिता प्रचारिता प्रसारिता च। नाविदितं कस्यापि प्रबुद्धजनस्यैतस्याः सर्वोत्कृष्टं महत्त्वमुपयोगित्वं च। प्राचीनैराचार्यैराधुनिकैश्च विद्वद्भिः समानरूपेण सम्मानिता अभिनन्दिता परः शतैः प्रवीणैः साम्प्रदायिकैराचार्यैर्यथा स्वपक्षे धृता, व्याख्याता, सादरं परिशीलिता, तथैव ततोऽप्यधिकतरमद्यतनी मानवता भगवद्गीतोपदेशमपेक्षते इति प्रवृत्तिः प्रसृताऽवलोक्यते। अतः विदुषाम् - संख्येयत्वात्, अल्पज्ञत्वाच्च - अस्माभिरत्र केषाञ्चिदेवाचार्यप्रवराणां नामोल्लेखः संक्षिप्तश्च परिचयोऽत्र दिग्दर्शनं क्रियते। सर्वप्रथमं श्रीशंकरभगवत्पादाचार्यप्रणीतं भाष्यं ज्येष्ठं पुरोगमतया श्रेष्ठं इति प्रसिद्धम्। तद्भाष्यावलोकनेन विज्ञायते यत् भाष्यकारं वृत्तिकारस्यासीत् पुरा। शांकरभाष्यं तु आनन्दगिरिव्याख्यामृतम्। ततस्तु आनन्दगिरिव्याख्यामृतम्। ततस्तु शांकरसम्प्रदायस्याद्वैतमतानुयायिभिः बहुभिराचार्यैः टीकोपटीकाः विरचिताः तथैव मधुसूदनसरस्वतीमतिवरेऽपि प्रवेशला इतीति।

सुभाषितानि :-



✱. यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते।।

✱. कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः।।

✱. असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।

✱. युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।

✱. नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।।

✱. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।

✱. यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

Scanned with ACE Scanner